**KAAV INTERNATIONAL JOURNAL OF ARTS, HUMANITIES & SOCIAL SCIENCES**
**A REFEREED BLIND PEER REVIEW QUARTERLY JOURNAL**
**KIJAHS/ APR-JUN (2018)/VOL-5/ISS-2/A3 PAGE NO. 15-19**
**ISSN: 2348- 4349 IMPACT FACTOR (2018) – 8.0121**
**WWW.KAAVPUBLICATIONS.ORG**

# SREEMAD RAMAYANE SUBHASHITHA RATNANI
# सुभाषित रत्नानि

**Dr. T. VENKATESWARLU**
M.A., Ph.D., Lecturer in Sanskrit, Govt. Degree College for Men (Autonomus), Kadapa, Andhra Pradesh

***ABSTRACT***
*महदिदं यद्यपि प्रमोदस्थानं यदाधुनिकवैज्ञानिकानां कृषिर्नवनवो न्मेषतया विकास माना सती मानवजीवनं सुखमयं विधातुमाकल्पत इति तथापि वैषयिकसुखस्य अनित्यत्वात् अल्पत्वाच्च मानवजीवनं न तावत् शान्तिप्रदं भवति यावदाध्यात्मिकोन्नतिः परिपुष्येत। अत एव त्रिकालवेदि नो महर्षयो मानवजीवनस्य सार्थकतां समुपकल्पयितुमेव नैकान् प्रबन्धान् बबन्धुः। तेषु सर्वप्रकारैरादिमं काव्यं महर्षिप्राचेतसापरनामधेयस्य वाल्मी केः श्रीमद्रामा यणमेवेति निर्विवादोऽस्ति। काव्यान्यपि वेदबोधितानर्थान् सरसतया सहृदयहृदयरञ्जकतया प्रतिपादयन्ति अत एव सत्काव्यानि श्रुत्यनन्तरं प्रमाणस्थानं आक्रान्तानि राजन्ते।*

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम्।।

महदिदं यद्यपि प्रमोदस्थानं यदाधुनिकवैज्ञानिकानां कृषिर्नवनवो न्मेषतया विकास माना सती मानवजीवनं सुखमयं विधातुमाकल्पत इति तथापि वैषयिकसुखस्य अनित्यत्वात् अल्पत्वाच्च मानवजीवनं न तावत् शान्तिप्रदं भवति यावदाध्यात्मिकोन्नतिः परिपुष्येत। अत एव त्रिकालवेदि नो महर्षयो मानवजीवनस्य सार्थकतां समुपकल्पयितुमेव नैकान् प्रबन्धान् बबन्धुः। तेषु सर्वप्रकारैरादिमं काव्यं महर्षिप्राचेतसापरनामधेयस्य वाल्मी केः श्रीमद्रामा यणमेवेति निर्विवादोऽस्ति। काव्यान्यपि वेदबोधितानर्थान् सरसतया सहृदयहृदयरञ्जकतया प्रतिपादयन्ति अत एव सत्काव्यानि श्रुत्यनन्तरं प्रमाणस्थानं आक्रान्तानि राजन्ते।

यद्यपि संसारो निस्सारः तापत्रयहेतुरत एव समूलमुच्छेद्य इत्येव आसनकादिभ्यः असकृद् वेदान्तिनो घोषयन्ति तथापि द्वित्रान् वर्जयित्वा न कश्चिद् संसारात् निवृत्तो दृश्यते। अत एव प्रवृत्तिपथि प्रचरतो नरान् उद्धर्तुं दयालुः पुरुषोत्तमः, मानुषं जन्म स्वीचकार। तदा पित्रादिषु बान्धवे षु प्रगाढं स्नेहं प्रदर्श्यापि धर्मरक्षणावसरे तेषु निर्ममत्वं न्यरूपयत्। ईदृशस्य धर्ममूर्तेः श्रीरामस्य मर्यादाचारणं महर्षिणा श्रीमद्रामायणे सुन्दर तया चित्रितं विराजते। यथा अस्य काव्यनायकस्य श्रीरामस्य कथा प्रचुरं प्रचारं गता तथा श्रीरामा यणार्णवे उपलब्धानि अनेकानेकानि सुभाषित रत्नान्यति नितरां प्रसिद्धिं गतानि अनर्घायन्ते। यथा विनीलाकाशे अमाया मपि निशि ज्योतींष प्रकाशन्ते तथा तमोगहसि मनसि सत्वा पादकानि इमानि सूक्तिरत्नानीति निश्चप्रचं वचः। तत्सुक्तीनां मननं मानवानां मनोमा लिन्यं दूरीकरोति। निर्मला मानवा माननीया महनीया भवितुमर्हन्ति श्रवणानन्तर श्रुति प्राप्तमननोपायभूतत्वेन तत्सूक्तीनामत्रैकत्र

**Copyright © 2017 Published by kaav publications. All rights reserved** www.kaavpublications.org

ग्रन्थनमेवास्य निबन्धस्याशयः।

'सत्यं वद' इत्यादिना वदता श्रुत्या प्रशासित अर्थ एव महर्षिणा श्रीरामकथाव्याजेन बह्वत्र बहुप्रकारैः वाक्यविन्यासैर्न्यरूपि। बहिरन्तश्शत्रुञ्जयसाधनं सत्यमेवेति महर्षेराशयः। अत एव श्रीरामः सत्येन लोकाञ्जयति • • • • • • • • • • इति दशरथोऽवदत्। ऋषीणां देवा नाञ्चापि सत्यमेवावलम्बनमिति श्रीरामः, जाबालिमुनि मतनिराकरणावसरे इदं

उदघोषयत्।

ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे।

सत्यवादी हि लोकेऽस्मिन् परं गच्छति चाक्षयम्।। 2-109-11

उद्विजन्ते यथा सर्पात् नरादनृतवादिनः। 2-109-12

सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्। 2-109-13

नैव लोभान्न मोहाद्वा न चाज्ञानात्तमोऽन्वितः।

सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः।। 2-109-17

सत्यं च धर्मं च पराक्रमञ्च भूतानुकम्पां प्रियवादिताञ्च।

द्विजातिदेवातिथिपूजनञ्च पन्थानामाहुस्त्रिदिवस्य सन्तः।। 2-109-31

इत्येवं रीत्या श्रीरामः सत्यस्य महत्वं उदीरयामास पितरं सत्यप्रतिज्ञं कर्तुमेव पुत्रस्य रामस्य आग्रह इति अत्र अवगन्तुं शक्यते। सत्यमहिम्ना श्रीरामो मनुष्यस्सन्नपि जटायुं पक्षिराजमनुत्तमान् लोकानग मयत्।

**पितृभक्तिः**

श्रीरामनामश्रवणानुपदं पितृभक्तिस्स्मर्यते सर्वैरपि भारतीयैः। 'पितेव पुत्रमभिरक्षता दिमम्' 'सूपायनो भव पितेव सूनवेऽग्ने''पितृदेवो भव' इत्या दीनि श्रुतिवाक्यानि पितुः अतिमहत्स्थानं निरूपयन्ति विराजन्ते। देवार्थोप बृंहणपरे श्रीरामायणे इतिहासेऽपि श्रीरामस्य पितृभक्तिः, तथा श्रवणकुमा रस्य पितृशुश्रूषा, इन्द्रजितः पितृविधेयता अङ्गदोपरि वालेरनुराग इत्यादयः सहृदयहृदयावर्जकानि सन्दृश्यन्ते। तत्तत्प्रकरणे महर्षिणा प्रोक्तानि महितो क्तयः अत्र लिख्यन्ते -

1 पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः। 2-21-49

2 गुरुश्चराजा च पिता च वृद्धः
क्रोधात् प्रहर्षादथवापि कामात्।
यद् व्यादिशेत् कार्यमवक्ष्यधर्मं
कस्तं न कुर्यादनृशंसवृत्तिः।। (2-21-59)

3 न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम्।
यथा पितरि शुशूषा तस्य वा वचनक्रिया।। 2-19-22

4 पितुर्वचननिर्देशात् पितुर्वचनगौरवात्।
वचनं कौशिकस्येति कर्तव्यमविशंकया।। 1-26-2

5 पितुर्हि वचनं कुर्वन् न किञ्चिन्नाम हीयते। 1-21-37

6 अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते।
स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम्। 2-30-32

7 पिता हि प्रभुरस्माकं दैवतं परमं च सः।
यस्य नो दास्यति पिता स नो भर्ता भविष्यति।। 1-33-22

**Copyright © 2017 Published by kaav publications. All rights reserved** www.kaavpublications.org

**धर्मः**

प्रमाणेषु यथा श्रुतीनां मूर्धन्यत्वमङ्गीकृतं तता रामायणस्यापि प्रामाणिकता आस्तिकैः सर्वैरपि अङ्गीकृता दृश्यत। धर्मप्रतिपादकतयैव अस्य काव्यस्प विद्यते तथाविध प्रमाणभूतत्वम्। प्रतिपक्षिणापि मारीचेन प्रत्यपादि 'रामो विग्रहवान् धर्म' इति। जानकी च रामाय स्मारयति धर्मस्य महत्वमित्थम् -

धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।
धर्मेण लभते सर्वं धर्मसारमिदं जगत्।।

एतादृशो धर्मो नियमैः ल्कैशैः आर्ज्यते न तु सुखेनेत्यपि सीता तत्र वदति-

आत्मानं नियमैस्तैस्तैः कर्षयित्वा प्रयत्नतः।
प्राप्यते निपुणैर्धर्मः न सुखाल्लभते सुखम्।।

एवं हनुमान् रावणं प्रति एवमुवाच -

न तु धर्मोपसंहारमधर्मफलसंहितम्।
तदेव फलमन्वेति धर्मश्चाधर्मनाशनः।। 5-51-28

श्रीरामो जटायुषमुद्दिस्य लक्ष्मणं प्रति एवमवोचत्-

सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः।
शूराः द्वारणयाः सौमित्रे तिर्यग्योनिगतेष्वपि।। 3-68-24

'न तितिक्षा सममस्ति साधन' मिति महाकविर्भारविः, 'मात्रास्मर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः। आगमापायिनोऽनित्याः तान् तितिक्षस्व भारत।।' इति श्रीकृष्णश्च। इत्यादिका वाक्यविशेषाः क्षमायाः प्राशस्त्यमुद्धोषयन्ति । कुशनाभस्य इक्ष्वाकुप्रवरस्य पुत्र्यः अपकारिणं वायुं शत्रुं, समर्था अपि न तथाऽकुर्वन् - अत एव पित्राभिनन्दिताः एवम् -

अलंकारो हि नारीणां क्षमा तु पुरुषस्य वा। 1-33-7
क्षमादानं क्षमा सत्यं क्षमा यज्ञश्च पुत्रिकाः।
क्षमा यशः क्षमा धर्मः क्षमायां विष्टितं जगत्।। 1-33-9

एतादृशक्षमाऽभावे कोपः स्थानं प्राप्नोति -श्रीरामवत् यो जितक्रोधः तस्य वशे कोपस्तिष्ठति -न तु कोपवशं कदापि स गच्छति। तथा च निर्दग्ध लंकापुरो हनुमान् वदति-

यः समुत्पतितं क्रोधं क्षमयैव निरस्यति।
यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते।। 5-55-6

यदा लक्ष्मणस्सीता तीक्षणोक्ति भिरुद्वेजितस्सन् तामेकाकिनीं कृत्वा रामं द्रष्टुमा जगाम, तदा रामः तं प्रति एवमुवाच-

'क्रोधस्य वशमागम्य नाकरोः शासनं मम।' 3-59-24

एवञ्च परिनिष्ठितमिदं यत् यः कोऽपि कोपवशं न गच्छेदिति - समर्थस्य क्षमा आभरणं भवतीति च।

अजन्मनो भगवतोजन्मदिनोत्सवाः पुराणेषु प्रसिद्धा दृश्यन्ते। भगवतः श्रीकृष्णस्य आविर्भावदिनं श्रावणबहुलाष टमीप्रयुक्तरोहिणीनक्षत्र युक्ता रात्रिः जयन्तिर्भवति। अत एव तस्मिन् दिने श्रीकृष्णजयन्त्युत्सवः प्रचलति। मानवानां पुनर्जन्मदिनमायुषः क्षयत्वंसूचयति इति कृत्वा नोत्स वाय कल्पते दशरथवियोगतप्तं भरतं सान्त्वयन् श्रीरामः इत्थं कथय ति -

नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमितेऽहनि।
आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयम्।।
हृष्यन्त्यृतुमुखं दृष्ट्वा नवं नवमिवागतम्।

**Copyright © 2017 Published by kaav publications. All rights reserved** www.kaavpublications.org

ऋतूनां परिवर्तेन प्राणिनां प्राणसङ्.क्षयः।। 2-105-24, 25

विश्वामित्रेण वरुणान्मुक्तः अजीगर्तस्य पुत्रश्शुनः शेफो दीर्घायुषातपस्तप्त्वा अनुत्तमस्वर्गलोकं जिगमिषति -

'स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमम्।'

एवं आयुषः सार्थकता च तपश्चरणेन भवति न तु लौकिकविषया नुभवेनेति अवगन्तुं शक्यते इति शम्। वनौकाअपि महर्षयो राजनीतिष्वपि पारङ्गता दृश्यन्ते, वाल्मीकि नापि श्रीरामायणे प्रसङ्गवशात् राजनीतयस्तत्र तत्र उदाहृतादृश्यन्ते। हस्त गतं राज्यं भ्रात्रे रामाय प्रत्य र्पयितुं वनमागताय भरताय कुशलप्रश्नव्याजेन राजनीतीः श्रीरामो विवृणोत्। ताः विहाय तत्र तत्र रामायणे विकीर्णा राज नीतीः अत्र उल्लिख्यन्ते।

1 नृशंसमनृशंसं वा प्रजारक्षणकारणात्।
पातकं वा सदोषं वा कर्तव्यं रक्षता सदा।।
राज्यभारनियुक्तानामेष धर्मः सनातनः। 1-25-18

2 आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः।
राजानः सम्प्रसीदन्ति प्रकृप्यन्ति विपर्यये।।
औरस्यानपि पुत्रान् हि त्यजन्त्यहितकारिणः।
समर्थान् सम्प्रगृह्णन्ति जनानपि नाराधिपाः।। 2-16-36
पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः। 3-1-19

3 क्षत्रियाणामिह धनुः हताशनस्येन्धनानि च।
समीपतः स्थितं तेजो बलमुच्छ्रयते भृशम्।। 3-9-277

4 अयुक्ताचारं दुर्दशमस्वाधीनं नराधिपम्।
वर्जयन्ति नरा दूरात् नदीपंकमिव द्विपाः।। 3-33-347

5 यस्मात्पश्यन्ति दूरस्थान् सर्वानर्थान् नराधिपाः।
चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः।। 3-33-10

6 व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः। 3-33-21

7 राज्ञो विप्रतिकूलस्थो न जातु सुखमेधते।। 3-40-26

**शोकः**

नरस्य शोकमपनुदन् वेदव्यासः (श्रीकृष्णः) अष्टादशाध्यायिनीं काम दुघां गीतां आविश्चकार। एवं वाल्मीकिरपि रुदन्तीं क्रोञ्चीमालक्ष्य चतु र्विंशस्ससहस्त्रश्लोकात्मकं श्रीसीतायाश्चरितवर्णनपरं महाकाव्यं श्रीमद्रामा यणमनुजग्राह। तस्मिन् काव्ये शोकस्यानर्थ तामुत्साहस्य सार्थतां कविचन मधुरैर्वचनैर्महर्षिर्ग्रन्थयामास। धर्मपरा कौसल्या पुत्रविरह शोकाकुला सती पतिमेवमुवाच -

शोको नाशयते धैर्यं शोको नाशयते श्रुतम्।
शोको नाशयते सर्वं नास्ति शोकसमो रिपुः।।
शक्यमापतितः सोढुं प्रहारो रिपुहस्ततः।
सोऽहमापतितः शोकः सुसूक्ष्मोऽपि न शक्यते।। 2-62-15, 16

एतादृशश्शोको मेरुनगधीरं श्रीराममपि क्षोभमनयत्। अत एव तस्य सखा सुग्रीवः प्रणयात् रामं प्रणम्येदमुवाच-

पौरुषं श्रम शोकस्य नान्तरं दातुमर्हसि।
ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम्।।
तेजश्च क्षीयते तेषां, न त्वं शोचितुमर्हसि।
शोकेनाभिप्रपन्नस्य जीविते चापि संशयः।

**Copyright © 2017 Published by kaav publications. All rights reserved** www.kaavpublications.org

स शोकं त्यज राजेन्द्र धैर्यमाश्रय केवलम्।। 4-7-12, 13

एतानि वाक्यानि नानाविधल्केशैः क्लिश्यमानानामाधुनिकानां मानवानां विशेषतो युवजनानां स्थैर्यापादकानि भवन्त्येव सुग्रीवसदृशस्सखा एव शोकापनोदने क्षमः इत्यप्य वधेयम्।

**श्रीराम**

श्रीमद्रामायणे लोकज्ञो महर्षिः वाल्मीकिः मैत्र्या वैशिष्ट्यमनेकैः सूक्तिविशेषैः न्यरूपयत्। महाराजपुत्रस्य श्रीरामस्य, आरण्यकस्य गुहस्य च सख्यं इदानीन्तनानामादर्श प्रायं भवेत्। ‘अत्र राजा गुहो नाम रामस्यात्म समस्सखा’ (2-50-33) एवं जटायोर्दश रथमहाराजस्य. च मैत्री अस्मान् आश्चर्यचकितान् करोति। ‘उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः।’(3-14-3)एवमेव सुमन्त्र इक्ष्वाकूणां तुल्यं मित्रमिति श्रीरामः स्वयमाह सुमन्त्रं प्रति- ‘इक्ष्वाकूणां त्वया तुल्यं सुहृदं नोपलक्षये।’ वानरराजः सुग्रोवोऽपि उपकार फलत्वेन मित्रमभूत्। (2-2-22) स सुग्रीव राममि त्थमुवाच- ‘त्वं वयस्योऽसि हृद्यो मे ह्येकं दुःखं सुखश्च नौ’ इति। (4-5-17) अनेन ज्ञायते समदुः खसुखत्वं मित्रलक्षणमिति- अस्मिन् मित्र प्रकरणे महर्षिणोदाहृतानि वाक्यानि समुद्धत्य प्रदर्श्यन्ते -

1 आढ्यो वापि दरिद्रो वा दुःखितस्सुखितोऽपि वा।
निर्दोषश्च सदोषश्च वयस्य परमागतिः।। 4-8-8
2 उपकारफलं मित्रमपकारोऽरिलक्षणम्। 4-8-21
3 नचातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते।
उभयं हि महादोषं तस्मादन्तरदृग्भव।। 4-22-23
4 सर्वदा सुकरं मित्रं दुष्करं प्रतिपालनम्। 4-32-7
5 मित्र स्वस्थानकुपितं जनयत्येव सम्भ्रमम्। 4-32-6
6 मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन। 6-8-3

श्रीमद्रामायणे महर्षिः रामकथाव्याजेन श्रीरामगुणवर्णनमिषेण च नीतिवाक्यानि सूत्रीचकार। श्रीरामः समः दुःखे सुखे चेति पट्टाभिषेकभङ्ग वृत्तान्तेन ज्ञायते तत्र वदति वाल्मीकिः-

न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम्।
सर्वलोकतिगस्येव लक्ष्यते चित्तव्रिक्रिया।। 2-19-33
स च नित्यं प्रशान्तात्मा मृदुपूर्वश्च भाषते।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते।। 2-1-10
कदाचिदुपकारेण कृतेनैकेन तुष्यति।
न स्मरत्यपकारेण शतमप्यात्मवत्तया।। 2-1-11
न चानृतकथो विद्वान् वृद्धानां प्रतिपूजकः।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते। 2-1-14
रामो द्विर्नाभिभाषते, 2-18-30
नाहमर्थपरो देवि लोकमावस्तुमुत्सहै।
विद्धि मामृषिभिस्तुल्यं विमलं धर्ममास्थितम्।।
निवासवृक्षः साधूनामापन्नानां परागतिः। 4-15-19
रामो नाम महातेजाः धर्म्यं पन्थानमाश्रितः। 5-40-6

इत्थं श्रीरामः स्वाचरणेन प्रबोधनेन मानवानां आदर्शप्रायोऽभूत् आराध्यश्चासीत् इति शम्।

**Copyright © 2017 Published by kaav publications. All rights reserved** www.kaavpublications.org